इति मेधातिथिव्याख्यानम्। तत्रायमभिसन्धिः औरसासत्त्वे क्षत्रियादेरसमानजातीयतया पिण्डोदकाद्यनर्हत्वेऽपि नामसंकीर्त्तनादिप्रयोजनकतया पुत्रत्वमुत्पद्यते एव शास्त्रीयत्वात् परन्त्वल्पोपकारतया ग्रासाच्छादनमात्रभागित्वं यदाह कात्यायनः “असवर्णास्तु ग्रासाच्छादनभागिन” इति। तथा शौनकः “यदि स्यादन्यजातीयो गृहीतोऽपि सुतः क्वचित्। अंशभाजं न तं कुर्य्याच्छौनकस्य मतं हि तत्।” याज्ञवल्क्येनाऽपि पिण्डदोऽंशहरश्चैषां पूर्व्वाभावे परः परः। सजातीयेष्वयं प्रोक्तस्तनयेषु मयाविधिः”। सजातीयस्य पिण्डदातृत्वांशहरत्वे विहिते न तु विजातीयस्य पुत्रत्वं निषिद्धम् व्यक्तमाह वृद्धयाज्ञवल्क्यः “सजातीयः सुतो ग्राह्यः पिण्डदाता स रिक्थभाक्। तदभावे विजातीयो वंशमात्रकरः स्मृतः “ग्रासाच्छादनमात्रन्तु स लभेत तदृक्थिन” इति। वस्तुतस्तु मुनिवचने सदृशपदस्य सजातीयार्थकतैव युक्ता परत्र तादृशदत्तकस्य विभागदर्शनात् असवर्णस्य च विभागासम्भवात्। “दौहित्रो भागिनेयश्चेति” दौहित्रभागिनेयनिषेधः शूद्रातिरिक्तविषयः तथा च शौनकः “क्षत्रियाणां सजातौ च गुरुगोत्रसमेऽपि वा। वैश्यानां वैश्यजातेषु शूद्राणां शूद्रजातिषु। सर्वेषामेव वर्णानां जातिष्वेव न चान्यतः। दौहित्रो भागिनेयश्च शूद्रैस्तु क्रियते सुतः। ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित्”। गुरुगोत्रसमेऽपि वेति क्षत्रियाणां प्रातिस्विकगोत्राभावात् गुरुगोत्रनिर्देशः “पौरोहित्यान् राजन्यविशां प्रवृणीते इति” सूत्रेण तस्य पुरोहितगोत्रभागित्वोक्तेः। जातिष्वेव नचान्यत इति नियमः सजातीयसम्भवे विजातीयनिषेधार्थः अन्यथा प्रागुक्तकात्यायनविरोधः स्यात्। तत्रापि सन्निहितसपिण्डेषु सति भ्रातृसुते स एव पुत्रीकार्य्य इत्याह मनुः “सर्व्वेषामेकजातानामेकश्चेत् पुत्रवान् भवेत्। सर्व्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत्”। वृहस्पतिः “यद्येकजाता बहवो भ्रातरस्तु सहोदराः। एकस्यापि सुते जाते सर्व्वे ते पुत्रिणः स्मृताः” इति। अत्र वचनद्वयेऽपि भ्रातृसुते पुत्रप्रतिनिधितया कथञ्चित् सम्भवति अन्यो न प्रतिनिधिः कार्य्य इत्यवगम्यते। न चापत्यमुत्पादयितव्यमिति नित्योह्ययं विधिः स यथा कथञ्चित् पालनीयस्तत्र भ्रातृव्ये पुत्रातिदेशेन तत्फलस्य

पिण्डोदकादेरलोकतापरीहारस्य च सिद्धत्वेन न पुनस्तत्र प्रवृत्तिरत एवाकृतस्यैव भ्रातृपुत्रस्य पुत्रत्वम्। “अपुत्रस्य पितृव्यस्य तत्पुत्रो भ्रातृजो भवेत्। स एव तस्य कुर्वीत श्राद्धपिण्डोदकक्रियामिति” वृहत्पराशरस्मरणात्। तस्मिन् सति तु न दत्तकाद्युपादानमिति वाच्यम्। भ्रातृव्यस्य पुत्रातिदेशेनालोकतापरीहारादिसाधकत्वेऽपि नामसंकीर्त्तनोचितवंशकरत्वानुपपत्त्या तदर्थं तदुपादानस्यावश्यकत्वात्। किञ्च इदं हि वचनद्वयं सति भ्रातृपुत्रे न दत्तकाद्युपादाननिषेधकं परन्तु श्राद्धादिकर्तृत्वरूपपुत्रधर्म्मातिदेशकम् अन्यथा सत्यपि भ्रातृपुत्रे क्षेत्रजपुत्रोत्पादनविधिविरोधापत्तेः। “अकृता वा कृता वापि यं विन्देत् सदृशात् सुतम्। पौत्री मातामहस्तेन दद्यात् पिण्डं हरेद्धनमिति” वचने दौहित्रेऽपि पौत्रातिदेशसत्त्वात् दौहित्रसत्त्वेऽपि प्रागुक्तयुक्त्या दत्तकाद्यनुपादानप्रसङ्गाच्च। ननु सत्यपि भ्रातृपुत्रे दत्तकाद्युपादानस्य शास्त्रीयत्वे “बह्वीनामेकपत्नीनामेष एव विधिः स्मृत” इति वृहस्पतिवचने “सर्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत्” सर्वास्ता स्तेन पुत्रेण प्राह पुत्रवतीर्म्मनुरिति” मनुवचने च सपत्नीपुत्रे पुत्रधर्म्मातिदेशेन सत्यपि तस्मिन् दत्तकाद्युपादानमस्त्विति चेन्न यथा “तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा भवति वाजिभ्यो वाजिनम्” इत्यत्रामिक्षार्थं प्रवृत्तस्योद्देश्यीभूतामिक्षापचारे अमिक्षा पुरुषं प्रवर्त्तयति न तु वाजिनम् अनुद्देश्यत्वेनाप्रयोजकत्वात् यथा वा पितुः क्षयाहे पित्रादित्रिकस्य पार्व्वणे कृते मातामहादिश्राद्धाय न पुनः पार्व्वणारम्भः तस्य पितृश्राद्धाधीनप्रवृत्तेः तथात्रापि भर्त्तुरनुज्ञाशास्त्रेण तत्पुत्रोपादानाय प्रवृत्तायास्तत्पुत्राभाव एव तदुपादानं न तु तत्पुत्रानपचारेऽपि स्वपुत्रापचारे तदुपादानं तत्प्रवृत्तेरप्रयोजकत्वात् तत्रालोकतापरीहारोऽस्या न स्यादित्यपेक्षायां मनुवृहस्पतिवचनद्वयं सपत्नीपुत्रे पुत्रातिदेशेनालोकतापरीहारश्राद्धोपपादकं, भर्त्तृवंशकत्वेन चास्या वंशान्तरासम्भवेन तस्यैव स्ववंशकरत्वं चेत्यतः समस्तस्यापि पुत्रप्रयोजनस्य सम्भवेन सति सपत्नीपुत्रे न दत्तकाद्युपादानं, भ्रातृपुत्रस्य तु वंशकरत्वाभावेन सत्यपि तस्मिन्नुपादीयन्ते दत्तकादय इत्येतावान् परं विशेषः। ननु सति भ्रातृसुते तस्यैव पुत्रीकरणावश्यम्भावे यत्रैक एव भ्रातृपुत्रस्तत्र तदसम्भवः। “नत्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि सन्तानाय